श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमत्पञ्चमतभञ्जन श्रीतातदेशिकविरचितं

# ॥ श्रीमन्निगमान्तमहादेशिककवचम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्निगमान्तमहादेशिककवचम् ॥

शुकतातं त्रयीमार्गे तत्तातं तत्त्वनिर्णये।
तत्तातततातमाचारे ताताचार्यमहं भजे॥ 1 ॥

श्रीमद्वेङ्कटनाथस्य कवचं दिव्यमुत्तमम्।
सर्वसम्पत्प्रदं नृणां मोक्षदं वक्ष्यते मया॥ 2 ॥

ध्यायेत् स्वर्णमयं दिव्यं सहस्रदलमुत्तमम्।
भास्वरं स्तोकविकचं कमलं हृदयान्तरे॥ 3 ॥

तन्मध्ये कर्णिकां ध्यायेत्तप्तहाटकरूपिणीम्।
तन्मध्ये चिन्तयेद्दिव्यं कनकं पीठमुत्तमम्॥ 4 ॥

तदन्तराले माणिक्यमयमुत्तममासनम्।
चतुरश्रं सान्द्रतरं तन्मध्येऽब्जं विचिन्तयेत्॥ 5 ॥

रत्नपीठं समासीनं तप्तकाञ्चनभूषणम्।
हारकेयूरकटकनूपुरादिविभूषितम्॥ 6 ॥

शङ्खचक्राञ्चितभुजं पद्ममालिकयान्वितम्।
तुलसीमणिमालाढ्यं सूर्ध्वपुण्ड्रविराजितम्॥ 7 ॥

मूर्तिमन्तमिवादित्यं पीताम्बरविराजितम्।
चन्द्राननं स्थूललक्षं सर्वशत्रुविनाशनम्॥ 8 ॥

चतुर्विधानामर्थानां पौरुषाणां सदा नृणाम्।
प्रदातारं कलानाथं ज्ञानदं सुगुणाकरम्॥ 9 ॥

पद्मपादं पद्मपाणिं पद्मास्यं पद्मलोचनम्।
पद्माकरं पद्मपीठं पद्मपत्रनिकेतनम्॥ **10** ॥

भूषाकिरणसन्दोहविराजित दिगन्तरम्।
वक्त्राब्जनिर्गतोद्दाम वाणीसन्तानशोभितम्॥ **11** ॥

सर्वविद्यादानदीक्षं निर्हेतुकघृणान्वितम्।
सर्वतन्त्रस्वतन्त्रं श्रीवेङ्कटेशं महागुरुम्॥ **12** ॥

ज्ञानमुद्रापुस्तकाभ्यामलङ्कृतकरद्वयम्।
देवतासार्वभौमं तं ध्यायेद्वेदान्तदेशिकम्॥ **13** ॥

अस्य श्री वेदान्तदेशिककवचस्तोत्रमहामन्त्रस्य श्री विवेक ऋषिः।
अनुष्टुप् छन्दः।
भगवान् श्री वेदान्तदेशिको देवता।
श्री वेदान्तदेशिक प्रसादसिद्ध्यर्थे जपे विनियोगः।

**करन्यासः**

विद्याभेदैरुपचयवतां अङ्गुष्ठाभ्यां नमः।
वेदकल्पद्रुमाणां तर्जनीभ्यां नमः।
व्यक्तोल्लासद्विजपरिबृढव्याप्तशाखाशतानां मध्यमाभ्यां नमः।
श्रेयोमार्ग प्रतिभटजितः श्री विवेकस्य मौलौ अनामिकाभ्यां नमः।
भूयो भूयस्सपदि भविता कनिष्ठिकाभ्यां नमः।
भूयसी पुष्पवृष्टिः करतलकरपृष्ठाभ्यां नमः।
एवं हृदयाद्यङ्गन्यासः।

## ध्यानम्

विद्याभेदैरुपचयवतां वेदकल्पद्रुमाणां
व्यक्तोल्लासद्विजपरिबृढव्याप्तशाखाशतानाम्।
श्रेयोमार्गप्रतिभटजितः श्री विवेकस्य मौलौ
भूयोभूयस्सपदि भविता भूयसी पुष्पवृष्टिः॥

## अथ मूलमन्त्रजपः

श्रीमद्वेदान्तदेशिक द्वादशाक्षरमूलमन्त्रं सदाचार्योपदेशेन लब्ध्वा जपेत्।

## अथ कवचस्तोत्रध्यानम्

वेदान्तदेशिकः श्रीमान् शिरो मे पातु सर्वदा।
ललाटं वेङ्कटेशो मे भगवान् पातु मे दृशौ॥ 1॥

प्रधानप्रतितन्त्रज्ञो नासिकां पातु भाष्यकृत्।
भ्रुवौ श्रावयिता कर्णौ पातु मे देशिकोत्तमः॥ 2॥

गण्डौ मे पुण्डरीकाक्षः पातु मे चिबुकं कविः।
मुखं चन्द्रमुखः पातु तार्क्ष्यदत्तवरोऽधरम्॥ 3॥

ओष्ठं मे पातु बिम्बोष्ठश्शुद्धो मे दन्तसन्ततिम्।
हयग्रीवावतारो मे जिह्वां पातु बहुश्रुतः (श्रुतप्रदः)॥ 4॥

अनन्तसूरितनयः स्वान्तं पातु मतिं सुधीः।
स्थूललक्षस्त्रिकं पातु शिखावान् पातु मे शिखाम्॥ 5॥

कण्ठं घण्टावतारो मे स्कन्धौ सिद्धान्तदायकः।
हृदयं भयहर्ता मे वाचं मे पातु सत्यवाक्॥ 6॥

वक्षस्सहस्रवित् पातु कक्षौ पाषण्डखण्डनः।
शङ्खचक्रधरो बाहु पुण्ड्रं पातूर्ध्वपुण्ड्रधृक्॥ 7॥

अष्टाक्षरैकनिरतस्सत्तां पातु श्रुतिं श्रुतः।
मन्त्ररत्नप्रभावज्ञः पातु स्वात्मसमर्पणम्॥ **8** ॥

उत्तमश्लोकभावज्ञो यशः पातु मुदा कृती।
कूर्परौ सुरसेव्यो मे पार्श्वे मे पातु भास्करः॥ **9** ॥

व्याख्यामुद्राकरः पातु दक्षिणं पाणिमात्मवित्।
पातु पुस्तकहस्तो मे करं सव्यं कलानिधिः॥ **10** ॥

सुधाशी पातु मे कुक्षिं नाभिं मे सप्ततन्तुकृत्।
पृष्ठं मे पातु विश्वात्मा जिताक्षः पातु मे कटिम्॥ **11** ॥

ऊरू विष्णुरथः पातु जानुनी देवपूजितः।
मनोजवः पातु जङ्घे ब्रह्मरुद्रादिसेवितः॥ **12** ॥

गुल्फे नित्यः पातु सर्वहिताचरणतत्परः।
परशीर्षन्यस्तपादकटकः पातु मे पदे॥ **13** ॥

आरोग्यं पातु मे वैद्यः सत्त्वं सत्त्वमयो विभुः।
ब्रह्मवित् ब्रह्मनाडीं मे प्रापकः पातु मे गतिम्॥ **14** ॥

प्राप्यो मे ब्रह्मसायुज्यं पात्वनावृत्तिमुक्तिदः।
श्रीकरस्सम्पदं पातु विद्यां पाण्डित्यदो मम॥ **15** ॥

कवितार्किकसिंहो मे सर्वज्ञः प्रतिभां प्रभुः।
सर्वशक्तिः पातु बुद्धिं लक्ष्मीमङ्गलविग्रहः॥ **16** ॥

श्रीमन्नारायणात्मा मे स्वरूपं करुणार्णवः।
सर्वतन्त्रस्वतन्त्रो मां सर्वात्मा पातु सर्वदः॥ **17** ॥

वेदान्तदेशिकस्येदं कवचं निर्मितं शुभम्।
तदनुग्रहपात्रेण विवेकेन विपश्चिता॥ **18** ॥

## फलश्रुतिः

भक्तिमान् यस्सदोत्थाय शुचिस्तद्गतमानसः।
पुमान् यदि पठेन्नित्यं स परां श्रियमाप्नुयात्॥ 19 ॥

वेदान्तदेशिकस्येदं कवचं सर्वसिद्धिदम्।
यः पठेत् पुरुषो नित्यं तस्मिन् सन्निहितो हरिः॥ 20 ॥

उत्तमं कवचं गुह्यं ज्ञानदं पठतां नृणाम्।
सर्ववेदान्तमथनादेतत्सारं समुद्धृतम्॥ 21 ॥

पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम्।
विद्यार्थी लभते विद्यां एतत्पठनमात्रतः॥ 22 ॥

राज्यार्थी लभते राज्यं स्वर्गार्थी स्वर्गमश्नुते।
मोक्षार्थी लभते मोक्षं एतज्जप्त्वा यतेन्द्रियः॥ 23 ॥

वने रणे शत्रुमध्ये जलान्ते वाऽग्निमध्यतः।
महाभयेषु सत्स्वेतत्फठनान्मुच्यते भयात्॥ 24 ॥

प्रातर्मध्यदिने सायं यः पठेद्वैष्णवोत्तमः।
संसाराब्धेस्समुत्तीर्य प्राप्नुयात् परमं पदम्॥ 25 ॥

सकृत् पठनमात्रेण वाञ्छितं लभते नरः।
असकृत् पठतां नृणां न जाने कीदृशं फलम्॥ 26 ॥

सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते।
कवचास्यास्य सदृशं नास्ति नास्ति महीतले॥ 27 ॥

अस्तु वा कवचं लोके शतशश्च सहस्रशः।
एतत्तुल्यन्तु कवचं न भूतं न भविष्यति॥ 28 ॥

स्तम्भनं मोहनं वापि शोषणं दाहनं तथा।
सर्वं च साधयेद्विद्वान् यदि भक्त्या पठेन्नरः॥ 29॥

ताम्रे वा तालपत्रे वा श्रीपत्रे वा विलिख्य च।
राजते वापि सौवर्णे धारयेत् सर्वदा जपन्॥ 30॥

भूतं प्रेतपिशाचाश्च शाकिनी डाकिनी तथा।
ब्रह्मराक्षसवेताळाः नश्यन्त्येतज्जपेन च॥ 31॥

आधयो व्याधयो वापि दैवपीडादयस्तथा।
सर्वे नश्यन्ति निश्शेषमेतत्पठनमात्रतः॥ 32॥

सिंहव्याघ्र वराहाश्च मृगास्सर्पादयस्तथा।
एतच्छ्रवणमात्रेण पलायन्ते न संशयः॥ 33॥

अक्षिरोगं कर्णरोगं कुक्षिरोगं च देहिनाम्।
सर्वं च नाशयेत् क्षिप्रं एतज्जप्त्वा न संशयः॥ 34॥

पिशाचादिकृतं रोगमपि सर्पादिभिः कृतम्।
संप्रोक्ष्योत्सादयेत्तोयैः कवचेनाभिमन्त्रितैः॥ 35॥

कन्यार्थी प्रजपेद्यस्तु षण्मासं नियतेन्द्रियः।
सर्वलक्षणसंपन्नां कन्यां प्राप्नोति मानवः॥ 36॥

एकं वाञ्छितमुद्दिश्य पुमानेतत्पठन्नपि।
सर्वसिद्धिमवाप्नोति नात्र कार्या विचारणा॥ 37॥

तदेतत्कवचं दिव्यं सर्वमङ्गळदायकम्।
श्रीवैष्णवैरसूयादिरहितैः परिगृह्यताम्॥ 38॥

गुरुभक्तिविहीनाय वैष्णवद्रोहिणे तथा।
देवतानिन्दकायैतत् कथ्यतां न कदाचन॥ 39॥

शठाय चलचित्ताय यतिनिन्दापराय च।
मायाविनेपि न वदेत् तत्तत्संसर्गिणेऽपि च॥ **40** ॥

डम्भि हैतुकपाषण्डिनास्तिकेभ्यो दुरात्मने।
शुश्रूषारहितायैतत्कृतघ्नाय न चोच्यताम्॥ **41** ॥

भक्ति श्रद्धासमेताय भगवद्भक्ति काङ्क्षिणे।
गुरुभक्तिरतायैतत् कथयेन्निस्पृहो बुधः॥ **42** ॥

पञ्चकालपरायापि पञ्चसंस्कारधारिणे।
वैष्णवाय वदेद्विद्वान् प्रपन्नाय विशेषतः॥ **43** ॥

आर्ता भीता विषण्णा वा घोरव्याधिनिपीडिताः।
एतत्सङ्कीर्त्य कवचं मुक्तदुःखा भवन्ति हि॥ **44** ॥

अपराधसहस्रैश्च वृतः पठति चेन्नरः।
श्रियः पतिः स्वयं साक्षात्कृपापात्रं करोति तम्॥ **45** ॥

ब्रह्मरुद्रमहेन्द्रादि देवता अपि वीक्ष्य तम्।
पठन्तमेतत्कवचं शङ्कन्ते स्वं स्थिरं पदम्॥ **46** ॥

नानुकूल्यं न नक्षत्रं न तीर्थादिनिषेवणम्।
अस्य सङ्ग्रहणे पुंसां न किञ्चिदपि चिन्तयेत्॥ **47** ॥

किमत्र बहुनोक्तेन कवचस्यास्य यत्फलम्।
वक्तुं वर्षसहस्रैस्तच्छेषोऽपि न भवेत् प्रभुः॥ **48** ॥

॥ इति श्रीमन्निगमान्तमहादेशिककवचं समाप्तम्॥